ॐ श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

॥ श्रीमायावादखण्डनम् ॥

॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

नरसिंहो अखिलाज्ञानमतध्वान्तदिवाकरः ।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

विमतं आरम्भणीयं, अन्यथाप्रतिपादकत्वात्, यदित्थं तत् तथा, यथा सम्प्रतिपन्नम् । न हि ब्रह्मात्मैक्यस्य याथार्थ्यं तत्पक्षे । अद्वैतहानेः स्वरूपातिरेके । अनतिरेके स्वप्रकाशत्वादात्मनः सिद्धसाधनता । निर्विशेषत्वाच्च आत्मनो नानधिगतो विशेषः । सिद्धत्वात् स्वरूपस्य विशेषाभावाच्च नाज्ञानं कस्यचिदावरकम् । 'अनधिगतार्थगन्तृ प्रमाणम्' इति तन्मतम् ।

अज्ञानासम्भवादेव तन्मतमखिलमपाकृतम् । मिथ्यात्वे चैक्यस्याऽतत्त्वावेदकत्वमागमस्य स्यात् ? सत्यता च भेदस्य । एवमेव प्रयोजनमपि निरस्तम् — स्वरूपत्वान् मोक्षस्य पूर्वमेव सिद्धत्वात् । अज्ञान असम्भवेन चतुर्थप्रकाराभावात् पञ्चमप्रकारताऽपि निरस्ता । विषयप्रयोजनाभावादेवाऽधिकारी च । तदभावादेव सम्बन्धोऽपि ।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।

यस्मात् क्षरमतीतोऽहं अक्षरादपि चोत्तमः ।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ॥

इति गुह्यतमं शास्त्रं इदमुक्तं मयाऽनघ ।
एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत" ॥

(भ.गी. १५.१६-२०)

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥

महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" ॥

(क.उ. १.३.१०-११)

"भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति" (ब्र.सू. ३.३.५९)

— इति विष्णोः सर्वोत्तमत्वमेव सर्वशास्त्रार्थत्वेन भगवता, श्रुत्या च अभिहितम् ॥

इति सर्वज्ञमुनिना मायावादमतोऽखिलम् ।
निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥

"नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम्" ॥

(महाभारत §)

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

मायावादखण्डनं सम्पूर्णम्

श्रीपद्मनाभतीर्थभट्टारकविरचिता

मायावादखण्डान टीका

॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

अमितसज्ज्ञानसुखशक्तिपयोनिधित्वात् "नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकर" इत्युक्तम् । तत्र सज्ज्ञानेन अज्ञानानव्युदसनप्रकारं आह — 'विमतं अनारम्भणीयम्" इत्यादिना । जैनादिमतवत्स्वमतस्यापि बाधितविषयत्वेनाङ्गीकारान् मायावादिना जैनबौद्धादिग्रन्थवन्मायावादो नारम्भणीयो बाधितविषयत्व अविशेषादित्यर्थः । मायावादस्य बाधितविषयत्वं प्रतिपादयति ।

"न हि" इत्यादिना — ब्रह्मात्मैक्यं हि मायावादप्रतिपाद्यम् । न हि तन्निरूपयितुं शक्यते मायावादिना? तथा हि — यदेतद् ब्रह्मैक्यमात्मनस्तदेतदात्मव्यतिरिक्तं, आत्मस्वरूपं वा । आत्मातिरिक्तं सत्यं चेद् अद्वैतहानिस्स्यात् । आत्मातिरेकेण वस्त्वन्तरानभ्युपगमात् । आत्मनोऽनतिरेके सिद्धसाधनता नापत्तिर्दोषस्स्यात् । स्वयम्प्रकाशाऽत्मस्वरूपप्रतिपादकस्य अमानत्वं स्यात्? अज्ञातज्ञापकस्य मानत्वेन अङ्गीकृतत्वात् । ज्ञेयत्वादेवात्मनो मिथ्यात्वं स्यात्? ज्ञेयस्य शुक्तिरजतवन् मिथ्यात्वाङ्गीकारात् । न च 'केनचिदाकारेण स्वयम्प्रकाशमानोऽपि विशेषकारेण मायावादप्रतिपाद्य' इति वाच्यम् — निर्विशेषत्वेनाङ्गीकृतत्वात् तस्य । आत्मानस्स्वयम्प्रकाशस्याज्ञानासम्भवान् न 'अज्ञानकल्पितो विशेषः शास्त्रप्रतिपाद्य' इति वक्तुं शक्यते । न तु 'कथं अज्ञायमानासम्भवेन अज्ञानासम्भवन्नाज्ञान निवृत्त्यर्थो मायावाद' इति वक्तुं शक्यत्वाद्, इत्यर्थः । ब्रह्मैक्यमात्माऽतिरिक्तं सत्यं चेद्? 'अद्वैतभङ्गः स्याद्?' इत्युक्तम् । तन्न । ब्रह्मात्मैक्यस्य मिथ्याभूतत्वाद् इत्याशङ्क्य परिहरति — "मिथ्यात्वे चैक्यस्य" इति । ब्रह्मात्मैक्यं हि वेदान्तप्रतिपाद्यं अङ्गीकृतं मायिना । तस्य मिथ्यात्वे वेदस्यातत्त्वावेदकत्वेन अप्रामाण्यं स्यात्? जीवब्रह्मणोरैक्यस्य मिथ्यात्वेन भेदस्य सत्यता स्यात्? परस्परविरुद्धयोर् एकतरनिषेधस्यान्यतरविधि नियतत्वात् । अतो, "द्वासुपर्णा" (मु.उ. ३.१.१) इत्यादि जीवेशभेदवाक्यानुरोधेन "तत्त्वमसि" (छा.उ. ६.८.७, ६.९.४, ६.१०.३, ६.११.३, ६.१२.३, ६.१३.३, ६.१४.३, ६.१५.३, ६.१६.३) इत्यावाक्यमग्निर्माणवक इतिवद् गौणार्थमवगन्तव्यं, इत्यर्थः ।

यथा जीवब्रह्मैक्यलक्षणविषयकत्वमपि निरूपयितुमशक्यत्वन बाधितं, तथा प्रयोजनमपि

निरूपयितुमशक्यत्वेन बाधितं, इत्याह — "एवमेव प्रयोजनमपि निरस्तम्" इत्यादिना । यदेतत् साधनवैयर्थ्यात् न चात्मज्ञाननिवृत्तिर्मोक्ष इति वक्तुं शक्यते, आत्मनः स्वयम्प्रकाशमानस्याज्ञानसम्भवेन तन्निवृत्त्यसम्भवात् । न सन्नासन्नापि सदसन्न सदसद्विलक्षणः, किन्तु पञ्चमप्रकारोऽज्ञाननिवृत्तिरूपो मोक्ष इति यन्मायिनोक्तं तदप्यत एव निरस्तं भवति । सदसद्विलक्षणरूपचतुर्थप्रकाराज्ञानासम्भवेन पञ्चमप्रकारस्य अज्ञाननिवृत्तिरूपमोक्षस्य सुतरां असम्भवात् । अज्ञानविलक्षणया आत्मज्ञाननिवृत्त्या भाव्यम् । भावाभावयोर्भिन्नप्रकारत्वादिति सदसद्विलक्षणरूप ज्ञाननिवृत्त्याख्यमोक्षस्य पञ्चमप्रकारत्वं कल्पितं तदज्ञानसम्भवे न सम्भवति, इत्यर्थः । अत उक्तप्रकारेण मायावादे विषयप्रयोजनासम्भवादसम्भावितं प्रयोजनं उद्दिश्य असम्भावितविषयप्रतिपत्त्यर्थं तद्बुद्धिमान् अधिकारी न प्रवर्तत इत्यधिकारी च निरस्तः । अधिकारि, विषय, प्रयोजन, सम्भवादेषां साध्यसाधनभावरूपः सम्बन्धोऽपि निरस्तः तदाह — "विषयप्रयोजनाभावात्" ।

बाधितत्वान् न 'ब्रह्मात्मैक्यं वेदप्रतिपाद्यम्' इत्युक्तम् । 'तर्हि किं वेदप्रतिपाद्यम्?' इत्यपेक्षितार्थं भगवद्वाक्येन साधयति — "द्वाविमौ पुरुषौ" इत्यादिना । अस्यार्थो नारायणश्रुत्योच्यते —

"ब्रह्मरुद्रादयस्सर्वे शरीरक्षरणात्क्षराः ।
श्रीरक्षरात्मेत्युदिता नित्यचिद्देहका यतः ।
चेतनाचेतनस्यास्य राशेस्संशायकत्वतः ।
कूटस्थ आत्मा स ज्ञेयः परमात्मा हरिः स्वयम् ।
क्षराक्षरात्मनोर्यस्मादुत्तमस्स सदाऽनयोः ।
पुरुषोत्तमनाम्नाऽतः प्रसिद्धो लोकवेदयोः" ॥

इत्येतदर्थो विविच्य स्मृत्या समाख्यात इति योज्यम् — "इन्द्रियेभ्यः परा ह्यर्थो" इति ।

एतत् श्रुत्यर्थः पुराणग्रन्थेनोच्यते —

"देवेभ्य इन्द्रियात्मभ्यो ज्यायांसोऽर्थाभिमानिनः ।
सोमवित्तसूर्याप्पा अश्व्यग्नीन्द्रेन्द्रसूनवः ॥

यमो दक्षश्चेन्द्रियेशास्सुपर्णो वारुणी तथा ।
उमेति चार्थमानिन्यस्तिस्रो द्विद्व्येकदेवताः ॥

मनोभिमानिनो रुद्रवीन्द्रशेषास्त्रयोऽपि तु ।
ते श्रेष्ठा अर्थमानिभ्यस्तेभ्यो बुद्धिस्सरस्वती ॥

तस्या ब्रह्मा महानात्मा ततोऽव्यक्ताभिधा रमा ।
तस्यास्तु पुरुषो विष्णुः पूर्णत्वान्नैव तत्समः ।
कश्चित्कुतश्चिच्छ्रेष्ठस्तु नास्तीति किमु सा कथा" ॥

— इति । द्विद्व्येकदेवता इत्यनेन द्व्योश्शब्दस्पर्शयोस्सुपर्णी देवता, रूपरसयोर्द्व्योर्वारुणी देवता, गन्धस्योमा देवतेत्युक्तं भवति ।

सर्वशास्त्रार्थत्वेन यद्विष्णोस्सर्वोत्तमत्वं तद्भगवत्त्वाद्युक्तं तद्भगवत्कृत ब्रह्मसूत्रेण दृढयति — "भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति" इति । 'वैदिकत्वेन मायावादस्य प्रकृतत्वेन सज्जनानां विष्णोस्सर्वोत्तमत्वं वर्णितं, न वा?' इति संशयस्स्यात् । तन्निवृत्त्यर्थं मायावादं निराकृत्य तत्त्ववादेन ब्रह्मेशानादिजगदुत्तमत्त्वं विष्णोस्स्थापितं श्रीमदानन्दतीर्थमुनिनेत्याह — "इति सर्वज्ञमुनिना" इति । उक्तार्थे दृढविश्वासार्थं भगवद्वेदव्यासवचनं महाभारताद्युक्तं उदाहरति — "नास्ति नारायणसमम्" इति । "नास्ति नारायणसमं न भूतं न भविष्यति" इत्यस्य वाक्यस्य सत्यत्वकथनेन रुद्रादेर्जगदुत्तमत्ववचनं पुराणादिगतं अन्यथाऽर्थ इति सूचितम् ।

इति श्रीमदानन्दतीर्थभगवत्पादविरचितमायावादखण्डनटीका

श्रीपद्मनाभतीर्थभट्टारकविरचिता समाप्ता

श्री पाण्डुरङ्गि केशवाचार्य विरचितः

मायावादखण्डनोपन्यासः

ननु —

नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकरः ।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

— इत्याद्यपद्ये अखिलाज्ञानमतस्य ध्वान्तसमत्वं आचार्यैः प्रतिपादितम् । तदयुक्तम् । "तत्त्वमसि" ((छा.उ. ६.८.७, ६.९.४, ६.१०.३, ६.११.३, ६.१२.३, ६.१३.३, ६.१४.३, ६.१५.३, ६.१६.३), "अहं ब्रह्मास्मि" (बृ.उ. १.४.१०) इत्यादि श्रुतिभिः, "अहं हरिः सर्वमिदं जनार्दनः" इत्यादि स्मृतिभिश्च जीवब्रह्मैक्यस्य तात्पर्येण प्रतिपादनात् । चैतन्यातिरिक्तस्याखिलस्य सत्यत्वे अखिलान्तर्गतानां सर्वज्ञत्वाल्पज्ञत्वादिविरुद्धधर्माणामपि सत्यत्वाऽपत्त्या सर्वज्ञत्वाज्ञत्वादि विरुद्धधर्माधिकरणयोर्जीवब्रह्मणोः जलानलयोरिव ऐक्यायोगेन श्रुतितात्पर्यविषयीभूत जीवब्रह्मैक्य अन्यथाऽनुपपत्त्या चैतन्यव्यतिरिक्तस्य अखिलस्याज्ञानकल्पितत्वस्य सिद्धत्वेन तन्मतस्य प्रामाणिकत्वादिति चेद्, अत्र ब्रूमः ।

श्रुतितन्मीमांसादेर्जीवब्रह्मैक्याप्रतिपादकत्वात् कर्मादाविव तात्पर्याभावेन जीवब्रह्मैक्यस्यश्रुतितात्पर्यविषयत्वस्यासिद्धत्वेन तदन्यथा अनुपपत्तेरभावेन त्वयाचैतन्यातिरिक्तस्य अखिलस्याज्ञानपरिकल्पितत्व सिद्धेर्निर्वक्तुमशक्यत्वात् । न च श्रुत्यादेरुपक्रमादि तात्पर्यलिङ्गैर्जीवब्रह्मैक्यपरत्वसिद्धेस्तदन्यथाऽनुपपत्तिसत्वेन तथा चैतन्यातिरिक्तस्याखिलस्याज्ञानपरिकल्पितत्वसिद्धिः सम्भवत्येवेति वाच्यम् । तथात्वे श्रुत्यादेरनारम्भणीयत्वप्रसङ्गात् । तथाहि । आरम्भणीयत्वानारम्भणीयत्वाभ्यां वादिप्रतिवादिविमतिविषयीभूतं, श्रुतितन्मीमाम्साशास्त्रं यदि जीवब्रह्मैक्यप्रतिपादकं स्यात्, तदा, प्रत्यक्षावदनुपादेयं स्यात्, सम्प्रतिपन्नबौद्धादिशास्त्रवत् । न च श्रुत्यादेर्जीवब्रह्मभेदपरत्वे प्रेक्षावदुपेयत्ववत् ऐक्यपरत्वेऽपि प्रेक्षावदुपादेयत्व सम्भवेन आपाद्यां प्रत्यापादकस्याप्रयोजकत्वेन आपाद्यपादकयोर्व्याप्तेरभावात्कथं 'एतदापादनम्' इति वाच्यम्? श्रुत्यादेर्जीवब्रह्मैक्यप्रतिपादकत्वे अयथार्थप्रतिपादकत्वापत्त्या अयथार्थप्रतिपादकत्वस्य प्रेक्षावदनुपादेयत्वेन सह व्याप्तेः बौद्धादिशास्त्रे दृष्टत्वेन, यदि शास्त्रं जीवब्रह्मैक्यप्रतिपादकं स्यात्, तदा अयथार्थप्रतिपादकं स्यात्, यदि चायथार्थप्रतिपादकं स्यात्तदा प्रेक्षावदनुपादेयं स्याद्, इति ऐक्यप्रतिपादकत्वेन अयथार्थप्रतिपादकत्वं आपाद्यायथार्थप्रतिपादकत्वेन प्रेक्षावद्

अनुपादेयस्याऽपाद्य मानत्वेनाप्रयोजकत्वस्य वक्तुमशक्यत्वात् । न च श्रुत्यादेर् जीवब्रह्मभेदप्रतिपादकत्वे यथार्थप्रतिपादकवदैक्यप्रतिपादकत्वेऽपि अयथार्थ प्रतिपादकत्वाभावः किं न स्याद्? — इति वाच्यम् ।

मन्मते, भेदस्य सत्यत्ववत् त्वन्मतेऽभेदस्य सत्यत्वाभावेन अयथार्थत्वात प्रतिपादकस्य श्रुत्यादेरयथार्थप्रतिपादकत्वस्य अवश्यकत्वात् । न च त्वया भेदस्य सत्यत्ववन् मयाप्यभेदस्य सत्यत्वाङ्गीकारात् । 'तत्प्रतिपादकश्रुत्यादेर्यथार्थप्रतिपादकत्वं सम्भवति एव', इति वाच्यम् । त्वन्मते ऐक्यस्य यथार्थत्वसत्यत्वानुपपत्तेः ।

तथा हि — ऐक्यं यथार्थं, सत् ब्रह्मस्वरूपातिरिक्तं वा, ब्रह्मस्वरूपं वा, इति विकल्पयामः । तत्र न तावदाद्यः त्वया ब्रह्मातिरिक्तस्य सर्वस्य मिथ्यात्वाङ्गीकारेण ऐक्यस्य ब्रह्मातिरिक्तत्वेऽपि यथार्थत्वे प्रोच्यमाने अद्वैतहान्यापत्तेः । न च मया भावरूपसत्यद्वयानङ्गीकारेऽपि अभावरूपसत्यद्वितीयाङ्गीकारेण अद्वैतस्य द्वैताभावरूपत्वेन तस्य सत्यत्वाभ्युपगमेऽपि नाद्वैतहानिरिति वाच्यम् । तथात्वे भावरूपाणां अभावनिष्ठानां अभावत्वादिधर्माणां सत्यत्वाऽपत्त्या अद्वैतहानेस्तदवस्थात् । नापि 'अद्वैतं ब्रह्मस्वरूपं' इति द्वितीयः पक्षः सम्भवति । 'अवेद्यत्वं स्वप्रकाशत्वम्' इति त्वत्पक्षे ब्रह्मणः स्वप्रकाशत्वेन, अवेद्यत्वेन तदात्मैकैक्यस्यापि अवेद्यत्वे, न 'शास्त्रस्य तत् प्रतिपादकत्वानुपपत्त्याऽवेद्यत्वं स्वप्रकाशत्वम्' इत्यस्य पक्षस्यानङ्गीकर्तव्यत्वेन स्वविषयप्रकाशत्वं स्वप्रकाशत्वं इति मत्पक्षस्यैवाङ्गीकर्तव्यत्वेन तत्र च ब्रह्मणः स्वप्रकाशत्वेन नित्यसिद्धत्वेन तदात्मकस्याद्वैतस्यापि नित्यसिद्धत्वेन तत्प्रतिपादकस्य सिद्धार्थबोधकत्वेन सिद्धसाधनतापत्तेः ।

न च त्वन्मते गुणगुणिनोरभेदेन रूपाभिन्नघटस्य स्पार्शनत्वेऽपि तदात्मकस्य रूपस्यास्पार्शनत्ववत् अद्वैतस्य ब्रह्माभिन्नत्वेऽपि ब्रह्मणः स्वप्रकाशत्वेन नित्यसिद्धत्वेऽपि अद्वैतस्यासिद्धत्वसम्भवेन तत्प्रतिपादकस्य शास्त्रस्य न सिद्धसाधनतेति वाच्यम् । मन्मते गुणगुणिनोस्सविशेषभिन्नत्वेन भेदकार्यकारिविशेषस्य विद्यमानत्वेन तद्बलात् घटस्य स्पार्शनतायाः तदात्मकस्य रूपस्यास्पार्शनतायाश्च सम्भवेऽपि त्वन्मते । ब्रह्मणोर्निर्विशेषत्वेन भेदकार्यकारिविशेषाभावेन ब्रह्मणः सिद्धतायाः अद्वैतादिविशेषाक रस्यासिद्धतायाश्चा सम्भवेन तत्प्रतिपादकशास्त्रस्य सिद्धसाधनता परिहारसम्भवात् ।

न चाद्वैतस्य स्वप्रकाशकब्रह्माभिन्नत्वेन नित्यसिद्धत्वात्साक्षात् शास्त्रस्य तत्प्रतिपादकत्वाभावेऽपि तदज्ञाननिवर्तकत्वात् शास्त्रस्य न 'सिद्धसाधनता' इति वाच्यम् । अज्ञानस्यावरणत्वेनाऽवरणस्याव्रीयमाण व्याप्तत्वेन त्वन्मते आव्रीयमाणाभावेन तदावरणाज्ञानस्यासम्भवेन शास्त्रस्य तन्निवर्तकत्वानुपपत्तेः ।

तथा हि — अज्ञानस्याव्रीयमाणं भवेत्, किं ब्रह्मस्वरूपं वा स्यात्? ब्रह्मगतविशेषो वा इति विकल्पयामः । न तावदाद्यः । ब्रह्मस्वरूपस्य

स्वप्रकाशत्वेन नित्यसिद्धत्वेन तस्य आव्रिणमाणत्वासम्भवात् । नापि द्वितीयः, त्वन्मते ब्रह्मणो निर्विशेषत्वेन तद्गतविशेषस्याभावेन तस्याव्रीयमाणत्वानुपपत्तेः । तस्माच्छास्त्रस्यैक्यपरत्वे, तस्य स्वप्रकाशब्रह्मभिन्नत्वेन नित्यसिद्धत्वेन तत्प्रतिपादकशास्त्रस्य सिद्धसाधनत्वं दुर्निवारमेव ।

न चैक्यपरस्य शास्त्रस्य सिद्धार्थं बोधकत्वेऽपि "यथार्थं प्रमाणम्" इति प्रमाणलक्षणाक्रान्तत्वे तत्प्रामाण्यसम्भवेन अप्रामाण्या प्रसङ्गात्, 'नेदं अनिष्टापादनम्' इति वाच्यम् । "अनधिगतार्थगन्तृप्रमाणम्" इति भट्टोक्तप्रमाणस्यैव "व्यवहारे भाट्टनय" इति वदता त्वयाङ्गीकारेण, यथार्थस्य प्रमाणलक्षणत्वानङ्गीकारे ऐक्यप्रतिपादकस्य शास्त्रस्य यथार्थत्वेऽपि सिद्धार्थबोधकत्वेनाधिगतार्थगन्तृत्व अभावेनोक्तप्रमाण लक्षणान् आक्रमान्तत्वेन अप्रामाण्यस्य प्रसक्तयानिष्टापादनत्वसम्भवात् । तस्मात्, जीवब्रह्मैक्यस्य ब्रह्मस्वरूपातिरेके ब्रह्मस्वरूपस्य प्रकाशत्वेन नित्यसिद्धत्वात्, तदात्मैक्यस्यापि नित्यसिद्धत्वेन शास्त्रस्य सिद्धार्थबोधकत्वेन सिद्धसाधनताऽऽपत्या अनतिरेकपक्षस्याङ्गीकर्तुं अशक्यत्वेन अतिरेकपक्षस्यैव अङ्गीकर्तव्यत्वात् तत्राप्यैक्यस्य यथार्थत्वे अद्वैतहान्यापत्त्या अयथार्थत्वस्यैवाङ्गीकर्तव्यत्वेन तत्प्रतिपादकस्य शास्त्रस्य अयथार्थं प्रतिपादकत्वापत्त्या, 'यदि शास्त्रं ऐक्यप्रतिपादकं स्यात्, तदा अयथार्थप्रतिपादकं स्यात्, यदि चायथार्थप्रतिपादकं, स्यात्तदा प्रेक्षावानुपादेयं स्याद्', इति प्रसङ्गः सुस्थः ।

किञ्च शास्त्रस्य ऐक्यप्रतिपादकत्वे विषयादिशून्यत्वापत्त्या विषयादिशून्यस्य प्रेक्षावद् अनुपादेयत्वेन सह व्याप्तेः सर्वसम्मतत्वेन, यदि शास्त्रं ऐक्यप्रतिपादकं स्यात् तर्हि विषयादिशून्यत्वमापाद्य विषयादिशून्यत्वेन प्रेक्षावदनुपादेयत्वस्यापाद्यमानत्वान् नाप्रयोजकत्वेन चैक्यपरस्य शास्त्रस्य विषयाभावोऽसिद्ध इति वाच्यम् । सामान्यतो ज्ञातस्य विशेषाकारेण अज्ञातस्यैव विषयत्वेन तस्याज्ञानसापेक्षत्वेनाज्ञानस्याव्रीयमाणसापेक्षत्वेन त्वन्मते च उक्तरीत्या व्रीयमाणाभावेन तत्सापेक्षस्याज्ञानस्यासम्भवेन तत्सापेक्षविषयस्यापि अभावोपपत्तेः । किं च विषयत्वाभिमतस्यैक्यस्य ब्रह्मभिन्नत्वेऽपि यथार्थत्वे अद्वैतहान्यापपत्त्या अयथार्थत्वे तत्प्रतिपादकस्य शास्त्रस्यातत्त्वावेदकत्वेन अप्रामाण्यापत्त्या परस्परविरुद्धत्वेनाभेदस्यासत्वे भेदस्य सत्यत्त्वापत्त्या चातिरेकपक्षस्याप्रामाणिकत्वेन अनतिरेकपक्षे च ब्रह्मणः स्वप्रकाशत्वेन नित्यसिद्धत्वात्तदात्मकैक्यस्यापि सिद्धत्वेनैक्यस्य विषयत्वानुपपत्तेः ।

किं च त्वन्मते प्रयोजनमपि न सम्भवति? "न चाविद्यास्तमयो मोक्षः स संसार उदाहृतः" इति वचनान्नाज्ञाननिवृत्तेः, प्रयोजनत्वसम्भवात् प्रयोजनाभावोऽसिद्ध इति वाच्यम् । त्वन्मतेऽज्ञानस्यैवासम्भवेन ज्ञाननिवृत्तेः प्रयोजनत्वानुपपत्तेः । किं च "आत्मैवाज्ञानहानिर्" इति वदतस्तव मते अज्ञाननिवृत्तेरात्मस्वरूपत्वेन आत्मस्वरूपस्य च शास्त्रात्प्रागेव सिद्धत्वेन मदात्मकाज्ञाननिवृत्तेरपि पूर्वसिद्धत्वेन शास्त्रसिद्धत्वाभावेन तत्प्रयोजनत्वानुपपत्तेः । न च अज्ञाननिवृत्तेर्ज्ञाता

आत्मरूपकत्वाङ्गीकारेण केवलाऽत्ममात्रत्वस्य चानङ्गीकारात् आत्ममात्रस्य च स्वप्रकाशतया
नित्यसिद्धत्वेऽपि ज्ञाताऽत्मनोऽसिद्धत्वेनाऽत्मज्ञानस्य च शास्त्रसाध्यत्वात्
'तदात्मकाज्ञानिवृत्तेः प्रयोजनत्वं सम्भवेत्येव', इति वाच्यम् । त्वन्मते
अज्ञाननिवृत्तेर्ज्ञाताऽऽत्ममात्रस्यैव अनुपपत्तेः ।

तथा हि — अज्ञाननिवृत्तेर्ज्ञाताऽऽत्ममत्रत्वं नाम, किं चिद्रूपज्ञानविषय
आत्ममात्रत्वं वा, ज्ञानविषयात्ममात्रत्वं वा, इति विकल्पयामः । नाऽद्यः —
आत्मनिश्चिद्रूपताज्ञानविषयत्वे तस्य फलव्याप्यत्वेन मिथ्यात्वात् तदात्मकाज्ञाननिवृत्तेः
सत्वप्रसक्तयाऽनिमोक्षत्वापत्तेः । नाऽपि द्वितीयः पक्षः सम्भवति, तत्रापि वृत्तिः, किमात्मनि
विशेषणं, उपलक्षणं वेति विकल्पयामः । नाऽद्यः । वृत्तेरात्मविशेषणत्वे
वृत्तिविशिष्टस्यात्मनो मोक्षत्वापत्त्या विशेषणनिवृत्तौ विशिष्टनिवृत्तेरावश्यकत्वेन
वृत्तेर्विनाशे वृत्तिविशिष्टस्यात्मनोऽपि निवृत्त्यापत्त्याऽनिर्मोक्षत्वप्रसङ्गात् । न द्वितीयः ।
वृत्तेरात्मोपलक्षणत्वे वृत्त्युपलक्षितस्याऽत्मनो मोक्षत्वापत्त्या जीवेन मुक्तत्वाभावप्रसङ्गात् ।

ननु चाज्ञाननिवृत्तेरात्मस्वरूपातिरिक्तत्वेन शास्त्रत्प्रागात्मस्वरूपसिद्धावपि
अज्ञाननिवृत्तेरसिद्ध्या शास्त्रसाध्यत्वोपपत्तेर्युक्तमेव तस्याः प्रयोजनत्वम् । न च
अद्वैतहान्यापत्त्या तस्याः सत्त्वस्य वक्तुमशक्यत्वात् । अनिर्मोक्षत्वापत्त्या असत्त्वस्य
वक्तुमशक्यत्वात् । विरोधापत्त्या सदसत्वस्य वक्तुमशक्यत्वात् । प्रतियोगितन्
निवृत्त्योवैलक्षणस्यावश्यकत्वेन सदसिद्धिलक्षणत्वादज्ञानस्य तन्निवृत्तेरपि सदसद्विलक्षणत्वे
अज्ञाननिवृत्तित्वस्यैवानुपपत्त्या सदसद्विलक्षणत्वादज्ञानस्य तन्निवृत्तेरपि सदसद्विलक्षणत्वे
अज्ञाननिवृत्तेः आत्मस्वरूपातिरिक्तत्वानुपपत्तिरिति वाच्यम् । नसन्नासन्न
सदसन्नानिर्वाच्यश्च तत्क्षयः । "यक्षानुरूपो बलिर्" इत्याचार्याः प्रत्यपीपदन् ।
'नित्यानन्दबोधोक्तरीत्या ज्ञानस्य सदसद्विलक्षणविलक्षणत्वरूप पञ्चमप्रकारतायाः
सिद्धत्वेन उक्तदोषाप्रसङ्गाद्" इति चेन्न । उक्तरीत्या त्वन्मते आव्रीयमाणा भावेन
आवरणरूपज्ञानासम्भवेन अज्ञानस्य सदसद्विलक्षणत्वरूप चतुर्थप्रकारस्यैवासिद्ध्याज्ञाननिवृत्तेः
सदसद्विलक्षणविलक्षणरूपं चमप्रकारत्वञ्चवस्य दूरनिरस्तात् । किं च
अज्ञाननिवृत्तेरात्मतस्वरूपातिरिक्तत्वे सा किमज्ञानकार्यभूता, स्यात्? उत न? इति विकल्पयामः ।
तत्र न तावदाद्यः । अज्ञाननिवृत्तेरज्ञानोपादानकत्वे उपादानेन विना उपादेययावस्थितेरसम्भवेन
अज्ञाननिवृत्तिदशायामज्ञानसत्वस्यावश्यं अङ्गीकर्तव्यत्वेन तदङ्गीकारे च अज्ञाननिवृत्तेः
स्वरूपस्यैवासम्भवेन पञ्चमप्रकारतायाः दूरनिरस्तत्वात् । नापि द्वितीयः । त्वया
ब्रह्मातिरिक्तस्य सर्वस्याज्ञानतत्कार्ययोरन्यतरत्वाङ्गीकारेण अज्ञाननिवृत्तेरात्मस्वरूपातिरिक्तत्वेऽपि
अज्ञानकार्यत्वाभावेन अविद्यातत्कार्ययोरन्यतरत्व अभावापत्त्या सिद्धान्ताभावापत्तेस्तस्माद्
ऐक्यस्य विषयत्वानुपपत्त्याऽज्ञान निवृत्तेश्च प्रयोजनत्वानुपपत्त्या विषयप्रयोजनकामस्य
चाधिकारिणोऽपि अभावेन तदभावादेव तदविनाभूत तत्सम्बन्धस्याप्यसम्भवेन यदि
शास्त्रं ऐक्यप्रतिपादकं स्यात्, तदा विषयादि शून्यं स्यात् । यदि च विषयादिशून्यं स्यात्,
तदा प्रेक्षावदनुपादेयं स्याद् — इत्यैक्यप्रतिपादकत्वे प्रेक्षावदनुपादेयत्वापत्त्या
जीवब्रह्मैक्यस्य श्रुतितात्पर्यविषयत्वाभावेन तदन्यथाऽनुपपत्तेरेवाभावेन तया

चैतन्यस्यतिरिक्तस्याखिलस्या प्रामाणिकत्वाद्युक्तमेव तस्य ध्वान्तसमत्वं प्रतिपादितं आचार्यैर्, इति सिद्धम् ।

इति श्रीविद्याधीशपूज्यपादशिष्येण पाण्डुरङ्गिः केशवेन

विरचितः मायावादखण्डनोपन्यासः

समाप्तोऽयं ग्रन्थः

॥ भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु॥